# M.A. 3rd Semester Examination, 2018

## SANSKRIT

PAPER – SAN-302

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

प्रश्नानां सर्वेषामुत्तरं संस्कृतेनैव प्रदेयम् :

1. 'भाक्तमाहुस्तमन्ये'–भाक्तमित्यस्य कोऽर्थः ? तमित्यनेन कस्य परामर्शः ? समुद्धृतवचस आशयं व्याख्याय तत्खण्डनं ध्वनिकारदिशा क्रियताम् । 10

*अथवा*

व्याङ्ग्यार्थस्य वाच्यार्थाद् वैलक्षण्यम् आनन्दवर्धनाचार्यदिशा सोदाहरणं प्रतिपाद्यताम् ।

( *Turn Over* )

2. सप्रसङ्गं व्याख्यायताम् — 5

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्च-द्वन्द्व-वियोगोत्थः शोकः श्लोकत्वमागतः ।।

*अथवा*

शब्दार्थ-शासनज्ञानमात्रेणैव न वेद्यते ।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम् ।।

3. भरतमुनेः नाट्यशास्त्रस्य प्रथमाध्याये उल्लिखितस्य जर्जरदण्डस्य उद्भवमुल्लिख्य तन्महिमानं च वर्णयत । 10

*अथवा*

का नाम मत्तवारिणी ? नाट्यगृहनिर्माणे कीदृशी मत्तवारिणी कर्त्तव्या ? इति विवेचनीया ।

4. का नाम अर्थप्रकृतिः ? तस्य भेदाः सोदाहरणं व्याख्यातव्याः । 10

*अथवा*

सन्धेः सामान्यं लक्षणमुल्लिख्य तद्भेदाश्च प्रतिपादनीयाः ।

**5.** सप्रसङ्गं व्याख्यायताम् – **5**

सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रदर्शकम् ।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम् ।।

*अथवा*

अन्यद्भावाश्रयं नृत्यम् ।

---